| | | | |
|---|---|---|---|
| नोत्तुम्, | नोदयितुम्, | नुनुत्सितुम्, | नोनुदितुम्; |
| नुत्तिः, | नोदना, | नुनुत्सा, | नोनुदा; |
| नोदनम्, | नोदनम्, | नुनुत्सनम्, | नोनुदनम्; |
| नुत्त्वा, | नोदयित्वा, | नुनुत्सित्वा, | नोनुदित्वा; |
| प्रणुद्य, | प्रणोद्य, | प्रणुनुत्स्य, | प्रणोनुद्य; |
| नोदम् २, } | नोदम् २, } | नुनुत्सम् २, } | नोनुदम् २; } |
| नुत्त्वा २, } | नोदयित्वा २, } | नुनुत्सित्वा २, } | नोनुदित्वा २; } |

[1]नौः.

(685) " णुद प्रेरणे " (VI-तुदादिः-1426. सक. अनि. पर.)

नोदकः-दिका, नोदकः-दिका, नुनुत्सकः-त्सिका, नोनुदकः-दिका; इत्यादीनि सर्वाण्यपि रूपाणि पूर्वलिखिततौदादिकनुदतिवत् (684) ज्ञेयानि। अस्य धातोः परस्मैपदिषु पाठात् शानच्प्रत्ययो न भवति। तुदादावेव पुनः पाठफलं तु—कर्तृगामिन्यपि क्रियाफले परस्मैपदित्वमिति बोध्यम्।

(686) " णू स्तवने " (VI. तुदादिः-1397. सक. सेट्. पर.) कुटादिः।

'—स्तुत्यां नुवति, नौति वा ॥' (श्लो. 24) इति देवः।

नावकः-विका, [2]नुविता-त्री, नुवन्-ती-न्ती, नुविष्यन्-न्ती-ती, प्रणूः, [3]प्रण्वौ-प्रण्वः, [4]नूतम्-नूतः-नूतवान्, नुवः, नुवितव्यम्, नुवनीयम्, नव्यम्, [5]अवश्यनाव्यम्, ईषन्नुवः-दुर्नुवः-सुनुवः, नूयमानः, नुवः-नुवितुम्,

---

1. 'ग्लानुदिभ्यां डौः' [द. उ. 2-12] इति डौप्रत्ययः। टिलोपः। नुदति, नुद्यते वा नौः=प्लवः।
2. अस्य धातोः कुटादिषु पाठात् 'गाङ्कुटादिभ्यः—' (1-2-1) इति ञित्णिद्-भिन्नानां प्रत्ययानां ङिद्वद्भावातिदेशात् 'क्ङिति च' (1-1-5) इति गुणनिषेधे, उवङादेशे च नुविता, नुविष्यन् इत्यादीनि रूपाणि बोध्यानि।
3. क्विबन्ते द्विवचनादौ 'उपसर्गादसमासेऽपि—' (8-4-14) इति णत्वे, 'ओः सुपि' (6-4-83) इति यण्।
4. अस्य कुटादित्वात् विशेषविहितेन ङिद्वद्भावेन क्तप्रत्ययस्य कित्त्वं बाध्यते। अतश्च 'श्र्युकः क्किति' (7-2-11) इति निषेधाप्रवृत्त्या इडागमे 'नुवितः-तवान्' इति केचिद्वदन्ति। तत्तु न समीचीनम्। अत एव 'गाङ्कुटादिभ्यः—' (1-2-1) इति सूत्रे भाष्ये—'तस्मात् नूत्वा धूत्वा इत्येव भवितव्यम्।' इत्युक्तिः सङ्गच्छते।
5. 'ओरावश्यके' (3-1 125) इति ण्यत्। आवादेशः।